শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫৪

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৫৪

*কালিযমর্দনে গোগোপানামুজ্জীৱনৱর্ণনম্*

ত্বতসেৱোতকসসৌভরির্নাম পূর্ৱং
কালিন্দ্যন্তর্দ্বাদশাব্দং তপস্যন্।
মীনৱ্রাতে স্নেহৱান্ ভোগলোলে
তার্ক্ষ্যং সাক্ষাদৈক্ষতাগ্রে কদাচিত্॥ ১ ॥

ত্বদ্বাহং তং সক্ষুধং তৃক্ষসূনুং
মীনং কঞ্চিজ্জক্ষতং লক্ষযন্ সঃ।
তপ্তশ্চিত্তে শপ্তৱানত্র চেত্ ত্বং
জন্তূন্ ভোক্তা জীৱিতং চাপি মোক্তা॥ ২ ॥

তস্মিন্ কালে কালিযঃ ক্ষ্ৱেলদর্পাত
সর্পারাতেঃ কল্পিতং ভাগমশ্নন্।
তেন ক্রোধাত্ ত্বতপদাম্ভোজভাজা
পক্ষক্ষিপ্তস্তদ্দুরাপং পযোগাত্॥ ৩ ॥

ঘোরে তস্মিন্ সূরজানীরৱাসে
তীরে ৱৃক্ষা ৱিক্ষতাঃ ক্ষ্ৱেলৱেগাত্।
পক্ষিৱ্রাতাঃ পেতুরভ্রে পতন্তঃ
কারুণ্যার্দ্রং ত্বন্মনস্তেন জাতম্॥ ৪ ॥

কালে তস্মিন্নেকদা সীরপাণিং
মুক্ত্ৱা যাতে যামুনং কাননান্তম্।
ত্বয্যুদ্দামগ্রীষ্মভীষ্মোষ্মতপ্তা
গোগোপালা ৱ্যাপিবন্ ক্ষ্ৱেলতোযম্॥ ৫ ॥

www.prapatti.com

নশ্যজ্জীৱান্ ৱিচ্যুতান্ ক্ষ্মাতলে তান
ৱিশ্বান্ পশ্যন্নচ্যুত ত্বং দযাৰ্দ্ৰঃ।
প্ৰাপ্যোপান্তং জীৱযামাসিথ দ্ৰাক
পীযূষাম্ভোৱৰ্ষিভিঃ শ্ৰীকটাক্ষৈঃ॥ ৬ ॥

কিং কিং জাতো হৰ্ষৱৰ্ষাতিৰেকঃ
সৰ্ৱাঙ্গেষৱিত্যুত্থিতা গোপসঙ্ঘাঃ।
দৃষ্টৱাগ্ৰে ত্বাং ত্বতকৃতং তদ্বিদন্ত-
স্তৱামালিঙ্গন্ দৃষ্টনানাপ্ৰভাৱাঃ॥ ৭ ॥

গাৱশ্চৈৱং লব্ধজীৱাঃ ক্ষণেন
স্ফীতানন্দাস্তৱাং চ দৃষ্টৱা পুৰস্তাত্।
দ্ৰাগাৱব্ৰুঃ সৰ্ৱতো হৰ্ষবাষ্পং
ৱ্যামুঞ্চন্ত্যো মন্দমুদ্যন্নিনাদাঃ॥ ৮ ॥

ৰোমাঞ্চোযং সৰ্ৱতো নঃ শৰীৰে
ভূযস্যন্তঃ কাচিদানন্দমূৰ্ছা।
আশ্চৰ্যোযং ক্ষ্বেলৱেগো মুকুন্দে-
ত্যুক্তো গোপৈৰ্নন্দিতো ৱন্দিতোভূঃ॥ ৯ ॥

এৱং ভক্তান্ মুক্তজীৱানপি ত্বং
মুগ্ধাপাঙ্গৈৰস্তৰোগাংস্তনোষি।
তাদৃগভূতস্ফীতকাৰুণ্যভূমা
ৰোগাত্ পাযা ৱাযুগেহাধিৱাস॥ ১০ ॥

**********